## अव्ययीभावे शरत्प्रभृतिभ्यः । (१०७/६७७)

शरत् इत्येवमादिभ्यः प्रातिपदिकेभ्यः टच् प्रत्ययो भवति[1] अव्ययीभावे[2] । शरदः समीपम् उपशरदम् । [3]प्रतिशरदम् । उपविपाशम् । प्रतिविपाशम् । अव्ययीभावे इति किम् ? परमशरत् । येऽत्र झयन्तः पठचन्ते तेषां नित्यार्थं ग्रहणम् । स्वर्यते चेदमव्ययीभावग्रहणं प्राग् बहुव्रीहेः ।

शरत् । विपाश् । अनस् । मनस् । उपानह् । दिव् । [4]हिमवत् । अनडुह् । दिश् । दृश् । चतुर् । यद् । तद् । 'जराया जरश्च' (ग. सू. १५७)। सदृश् । 'प्रतिपरसमनुभ्योऽक्ष्णः' (ग. सू. १५८) । पथिन् । प्रत्यक्षम् । परोक्षम् । समक्षम् । अन्वक्षम् । प्रतिपथम् । परपथम् । संपथम् । अनुपथम् ॥

## अनश्च । (१०८/६७८)

अन्नन्तादव्ययीभावात् टच् प्रत्ययो भवति समासान्तः । [5]उपराजम् । [6]प्रतिराजम् । [7]अध्यात्मम् । प्रत्यात्मम् ॥

## नपुंसकादन्यतरस्याम् । (१०९/६८०)

अनः इत्येव । नपुंसकग्रहणमुत्तरपदविशेषणम् । अन्नन्तं यद् नपुंसकं तदन्तादव्ययीभावात् अन्यतरस्यां टच् प्रत्ययो [8]भवति समासान्तः । पूर्वेण [9]नित्ये प्राप्ते विकल्प्यते । प्रतिचर्मम्, प्रतिचर्म । उपचर्मम्, उपचर्म[10] ॥

## नदी पौर्णमास्याग्रहायणीभ्यः । (११०/६८१)

नदी पौर्णमासी आग्रहायणी इत्येवमन्ताद् अव्ययीभावात् अन्यतरस्यां टच् प्रत्ययो भवति[11] । [12]नद्याः समीपम् उपनदम्, उपनदि । उपपौर्णमासम्, उपपौर्णमासि । उपाग्रहायणम्, उपाग्रहायणि ॥

## झयः । (१११/६८२)

झयः इति प्रत्याहारग्रहणम् । झयन्ताद् अव्ययीभावाद् अन्यतरस्याम् टच् प्रत्ययो भवति[13] । उपसमिमिधम्, उपसमित् । उपदृषदम्, उपदृषत्[14] ॥

## गिरेश्च सेनकस्य । (११२/६८३)

गिरिशब्दान्तात् अव्ययीभावाट् टच् प्रत्ययो भवति [15]सेनकस्य आचार्यस्य मतेन । अन्तर्गिरम्, अन्तर्गिरि । उपगिरम्, उपगिरि[16] । सेनकग्रहणं पूजार्थम् । विकल्पोऽनुवर्तते एव ॥

---

1. समासान्तः इत्यधिकम् क.फ. 2. समासे इत्यधिकम् ब.क.फ.ह. 3. प्रतिशरदम् नास्ति फ. 4. हेमन् फ. 5. उपदशम् क. ग. 6. प्रतिराजम् नास्ति ब. ड. 7. प्रत्यात्मम् क, महात्मम् ड. 8. भवति नास्ति फ. 9. नित्यप्राप्तः ड. 10. प्रत्यहम् प्रत्यह । यथार्थे यदव्ययम् इति समासः इत्यधिकम् क. 11. समासान्तः इत्यधिकम् ब. फ. 12. नद्याः समीपम् नास्ति फ, नदीति स्वरूपग्रहणम् सञ्ज्ञायाः इत्यधिकम् ड. 13. समासान्तः इत्यधिकम् ब क. फ. 14. झयः इति किम् ? उपगोधुक् इत्यधिकम् ड. 15. समासान्तः इत्यधिकम् फ, सेनकस्य मतेन नास्ति फ, आचार्यस्य नास्ति क. 16. अनुगिरम् अनुगिरि इत्यधिकम् ग.